**अव(ब)हित्था** स्त्री न बहिस्तिष्ठति स्था—क पृषो० । हृद्गत-भावे । "भयगौरवलज्जादेर्हर्षाद्याकारगुप्तिरवहित्था, व्यापारान्तरासक्त्यन्यथावभाषणाविलोकनादिकरी" सा०द०उक्ते व्यभिचारिभावभेदे। "एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी लीलाकमलपत्राणि गणयामास पार्व्वती" कुमा० । अयं वर्ग्यबमध्यस्तु न्याय्यः । [अनादरे ।

**अवहेल** स्त्री न०अव+हेड़—अङ् स्त्रियां,घञर्थे क वा ड़स्य लः।

**अवहेलन** अव+हेड़ अनादरे भावे ल्युट् डस्य लः । अनादरे ।

**अवहेलित** त्रि० अव+हेड—कर्म्मणि क्त डस्य लः । अवज्ञाते ।

**अवह्वर** त्रि० अव+ह्वृ—अच् । कुटिले । [पुष्पिकायाम् ।

**अवाक्पुष्पी** अवाक् अधोमुखं पुष्पमस्याः । (सुलफा) शत-

**अवाक्शाख** पु० अवाची शाखाऽस्य । "ऊर्द्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् । छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् । अधश्चोर्द्ध्वञ्च प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः । अधश्च मूलान्यनुसन्ततानि कर्म्मानुबन्धीनि मनुष्यलोके । न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च संप्रतिष्ठा । अश्वत्थमेनं सुविरूढ़मूलमसङ्गशस्त्रेण दृढ़ेन छित्त्वा । ततपदं तत्परिमार्गितव्यम्" गीतोक्ते संसारवृक्षे । "ऊर्द्ध्वमुत्तरः क्षराक्षराभ्यामुत्कृष्टः पुरुषोत्तमोमूलं यस्य तम् । अधइति ततोऽर्वाचीनाः कार्य्योपाधयोहिरण्यगर्भादयोगृह्यन्ते ते तु शाखाइव शाखायस्य तम् । विनश्वरत्वेन न श्वःप्रभातपर्य्यन्तमपि स्थास्यतीति विश्वासानर्हत्वादश्वत्थं प्राहुः । प्रवाहरूपेणाविच्छेदादव्ययञ्च । काः प्राहुः ? "ऊर्द्ध्वमूलोऽर्वाक्शाखएषोऽश्वत्थः सनातन" इत्याद्याः श्रुतयः । छन्दांसि वेदायस्य पर्णानि धर्म्माधर्म्मप्रतिपादनद्वारेण छायास्थानीयैः कर्म्मफलैः संसारवृक्षस्य सर्व्वजीवाश्रयणीयत्वप्रतिपादनात् पर्णस्थानीयावेदाः । यस्तमेवम्भूतमश्वत्थं वेद स एव वेदार्थवित् संसारप्रपञ्चवृक्षस्य मूलमीश्वरोब्रह्मादयस्तदंशाः शाखास्थानीयाः सच संसारवृक्षोऽविनश्वरः प्रवाहरूपेण नित्यः वैदोक्तैः कर्म्मभिः सेव्यतामापादितश्च इत्येतावानेव हि वेदार्थः अत एवं विद्वान् वेदविदिति स्तूयते। किञ्च अधश्चेति । हिरण्यगर्भादयः कार्य्योपाधयोजीवाः शाखास्थानीयत्वेनोक्तास्तेषु च ये दुष्कृतिनस्तेऽधः पश्वादियोनिषु प्रसृता-विस्तारं गताः सुकृतिनश्चोर्द्ध्वं देवादियोनिषु प्रसृतास्तस्य संसारवृक्षस्य शाखाः । किञ्च गुणैः सत्त्वादिवृत्तिभिर्जलसेचनैरिव यथायथं प्रवृद्धा वृद्धिं प्राप्ताः। किञ्च विषयारूपादयः प्रवालाः पल्लवस्थानीया यासां शाखाग्रस्थानीयाभिरिन्द्रियवृत्तिभिः संयुक्तत्वात् । किञ्च अधः, चशब्दादूर्द्ध्वञ्च मूलानि अनुसन्ततानि विरूढानि मुख्यं मूलमीश्वर एव इमानि त्वन्तरालानि मूलानि तत्तद्भोगवासनालक्षणानि । तेषां कार्यमाह मनुष्यलोके कर्म्मानुबन्धीनि कर्म्म अनुबन्धि उत्तरभावि येषां तानि ऊर्द्ध्वाधोलोकेष्वपि भुक्तभोगवासनाभिर्हि कर्म्मक्षये मनुष्यलोकप्राप्तानां तत्तदनुरूपेषु कर्म्मसु प्रवृत्तिर्भवति तस्मिन्नेव हि कर्म्माधिकारोनान्येषु लोकेषु अतोमनुष्यलोकइत्युक्तम्। किञ्च न रूपमिति । इह संसारे स्थितैः प्राणिभिरस्य संसारवृक्षस्य तथा ऊर्द्ध्वमूलत्वादिप्रकारेण रूपं नोपलभ्यते । न चान्तोऽवसानमपर्य्यन्तत्वात् । नचादिरनादित्वात् । नच संप्रतिष्ठा स्थितिः कथं तिष्ठतीति नोपलभ्यते । यस्मादेवम्भूतोऽयं संसारवृक्षोदुरुच्छेद्योऽनर्थकरश्च तस्मादेनं दृढेन वैराग्येण छित्त्वा तत्त्वज्ञानाय यतेतेत्याह अश्वत्थमेनमिति" श्रीधरः ।

**अवाक्शिरस्** त्रि० अवाक्शिरोऽस्य । अवनतमस्तके "अवाक्शिरसमुत्पादम्" भट्टिः ।

**अवाक्श्रुति** पु० नास्तिवाक् च श्रुतिश्च यस्य । वागिन्द्रियश्रवणेन्द्रियशून्ये अनेड़मूके । ( कालावोवा । )

**अवाकिन्** त्रि०उच्यतेऽनया वच—करणे घञ् वाकः, वागिन्द्रियं नास्ति यस्य इनि न०त०। १वागिन्द्रियशून्ये परात्मनि । "सर्व्वमिदमभ्यात्तोऽवाक्यनादरः" छा०उ०।(वोवा)२मूके च

**अवाग्र** त्रि०अवनतमग्रमस्य । नम्रमुखे ।

**अवाङ्मुख** त्रि० अवाङ् मुखमस्य । अधोमुखे । "अवाङ्मुखस्योपरि पुष्पवृष्टिः" रघुः ।

**अवाङ्मनसगोचर** पु०वाक् च मनश्च वाङ्मनसौ तयोर्गोचरो न भवति । वक्तुमशक्ये मन्तुमशक्ये च निर्गुणे ब्रह्मणि "यद्वाचानाभ्युद्यते येन वागभ्युद्यते" "यन्मनसा न मनुते येन मनोऽनुमन्यते" इत्यादि श्रुत्या तस्य तदविषयत्वोक्तेस्तथात्वम् । तज्जन्यवृत्त्यवच्छिन्नचैतन्याविषयत्वञ्च तदविषयत्वं तयोर्वृत्तिविषयत्वस्य तस्मिन्निष्टत्वात् "फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निराकृतम् । ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता" इत्युक्तेः अतएव "मनसैवानुद्रष्टव्यः" "तन्त्वौपनिषदं वेदेत्यादि" श्रुतिषु तद्विषय यतोक्तिः सङ्गच्छते "अखण्डसच्चिदानन्दमवाङ्मनसगोचरम्" वे०सा० ।

**अवाच्** त्रि० अवाञ्चति अव+अनुच—क्विप् । १अधोमुखगते, "अवाक्शिरसमुत्पादम्" भट्टिः । अवरे २देशे, ३काले च । ४दक्षिणस्यां दिशि स्त्री ङीप् । नास्ति वाक् यस्य ६ब० । ५वाक्यरहिते त्रि० वागिन्द्रियशून्ये ६ब्रह्मणि